# B.A. 5th Semester (Honours) Examination, 2020-21
# SANSKRIT

**Course ID: 50912** **Course Code: AHSNS-502C-12**

**Course Title: Indian Epigraphy, Palaeography and Chronology**

**Full Marks: 40** **Time: 2hrs**

**1. एकस्य प्रश्नस्य उत्तरं लेख्यम् ।** **10x1=10**

a) प्राचीनभारतीय-इतिहासनिर्माणे तथा संस्कृतेः पुनर्निर्माणे अभिलेखशास्त्रस्य महत्त्वम् आलोचनीयम्।

b) भारतवर्षे अभिलेखशास्त्राध्ययनस्य इतिहासः वर्ण्यताम्।

c) प्राचीनभारतीयलिपेः सामान्यः परिचय उपस्थाप्यताम्।

**2. यथेच्छं प्रश्नचतुष्टयस्य उत्तरं लेख्यम् ।** **5x4=20**

a) खरोष्ठीलिपेः इतिहासः वर्ण्यताम्।

b) अशोकस्य सारनाथलघुस्तम्भाभिलेख इति विषये टीका लेख्या।

c) अभिलेखे तिथ्याङ्कनपद्धतिः कथमासीत् संक्षेपेण आलोच्यताम्।

d) "पलाशिनीप्रभृतीनां नदीनामतिमात्रोद्वृत्तैर्वेगैः सेतुम् यमाणानुरूपप्रतीकारमपि गिरिशिखरतरुतटाट्टालकोपतल्पद्वारशरणोच्छ्रयविध्वंसिना युगनिधनसदृशेन..।" व्याख्यायताम्।

e) "पह्लवेन कुलैपपुत्रेणामात्येन सुविशाखेन यथावदर्थधर्मव्यवहारदर्शनैरनुरागमभिवर्धयता शक्तेन दान्तेनाचपलेनाविस्मितनार्येणाहार्येण।" व्याख्यायताम्।

f) मौर्यब्राह्मीलिप्यामनुलेखनं कार्यम् – इकं च लिपिं हेदिसमेव उपासकानांतिकं निखिपाथ। ते च उपासका अनुपोसथं यावु।

g) मौर्यब्राह्मीलिप्यामनुलेखनं कार्यम् – से अजा यदा धंमलिपी लिखिता ती एव प्राणा। एते पि त्री प्राणा पछा न आरभिसरे।

**3. यथेच्छं पञ्चप्रश्नाः समाधेयाः।** **2x5=10**

a) भारतीयपरम्परायां लेखनकलायाः आदिप्रवर्तकः कः ? अस्माकं भारतवर्षे सर्वापेक्षया प्राचीनतमः पाठोद्धृतः अभिलेखः खलु कः?

b) एराण इति स्थानस्य प्राचीनं नाम किम् ? समुद्रगुप्तस्य एराणाभिलेखे तस्य तुष्टिकोपौ काभ्यामुपमीयते ?

c) अशोकस्य कति अभिलेखाः प्रायः प्राप्यन्ते? महामतेः अशोकस्य द्विभाषामयः अभिलेखस्तावत् कः?

d) भारतवर्षे उपलब्धेषु कृतपाठेषु अभिलेखेषु के तावत् प्राचीनतमाः ? तेषां कालः कः?

e) प्राचीनभारतीयाभिलेखेषु कति ऋतवः उल्लिखिताः ? के च ते ?

f) अभिलेखः इति शब्दस्य व्युत्पत्तिः का ?

g) "शरवेदर्षिभूमाने शाके" इत्यस्य संख्यारूपेण कालः कः?

h) जुनागडप्रशस्तिः इति अभिलेखस्य विषयः कः ?